# भामहकाव्यालंकारः

Each directory should have a file called README bib.txt. with bibliographic entry with following details:-

| | | | |
|---|---|---|---|
| i. | Discipline | : | **Sahitya** |
| ii. | Name of the text | : | **Kavyalankar Sutra** |
| iii. | Author | : | **Bhamah** |

File named “README_type_log.txt” containing the following details:-

| | | | |
|---|---|---|---|
| i. | Name of the institute | : | **Rashtriya Sanskrit Sansthan, New Delhi** |
| ii. | (a) Principal Investigator | : | **Prof. Radhavallabh Tripathi** |
| | (b) Investigator | : | **Prof. R. Devnathan** |
| | (c) Co-investigator | : | **Dr. Shukla Mukherjee** |
| | (d) Editor | : | **Prof. K.P. Keswan** |
| iii. | Name of the typist | : | **Rajesh Kumar Sharma** |
| iv. | Completion date of data entry | : | **25.08.2009** |
| v. | Name of the proof reader | : | **Prof. K.P. Keswan & Dr. Vijaypal Shastri** |
| vi. | Completion date of proof reading | : | **10.09.2009** |
| vii. | Name of the approval authority | : | **Prof. Arkanath Chaudhari**, Principal, Rashtriya Sanskrit Sansthan, Jaipur Campus. |
| | Date of approval | | **22.03.2010** |

## आचार्यभामहकृतः

# काव्यालङ्कारः

आचार्यभामहप्रणीतः

काव्यालंकारः

प्रथमः परिच्छेदः

प्रणम्य सार्वं सर्वज्ञं मनोवाक्कायकर्मभिः।
काव्यालङ्कार इत्येष यथाबुद्धि विधास्यते॥१॥

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
प्रीतिं करोति कीर्तिं च साधुकाव्यनिबन्धनम्॥२॥

अधनस्येव दातृत्वं क्लीबस्येवास्त्रकौशलम्।
अज्ञस्येव प्रगल्भत्वमकवेः शास्त्रवेदनम्॥३॥

विनयेन विना का श्रीः का निशा शशिना विना।
रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता॥४॥

गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम्।
काव्यं तु जायते जातु कस्यचित्प्रतिभावतः॥५॥

उपेयुषामपि दिवं सन्निबन्धविधायिनाम्।
आस्त एवं निरातङ्कं कान्तं काव्यमयं वपुः॥६॥

रुणद्धि रोदसी चास्य यावत्कीर्तिरनश्वरी।
तावत्किलायमध्यास्ते सुकृती वैबुधं पदम्॥७॥

अतोऽभिवाञ्छता कीर्तिं स्थेयसीमा भुवः स्थितेः।
यत्नो विदितवेद्येन विधेयः काव्यलक्षणः॥८॥

शब्दश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः।
लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः॥९॥

शब्दाभिधेये विज्ञाय कृत्वा तद्विदुपासनाम्।
विलोक्यान्यबिन्धांश्च कार्यः काव्यक्रियादरः॥१०॥

सर्वथा पदमप्येकं न निगाद्यमवद्यवत्।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते॥११॥

नाकवित्वमधर्माय व्याधये दण्डनाय वा।
कुकवित्वं पुनः साक्षन्मृतिमाहुर्मनीषिणः॥१२॥

रूपकादिरलंकारस्तस्यान्यैर्बहुधोदितः।
न कान्तमपि निर्भूषं विभाति वनितानननम्॥१३॥

रूपकादिमलंकारं बाह्यमाचक्षते परे।
सुपां तिङां च व्युत्पत्तिं वाचां वाञ्छन्त्यलङ्कृतिम्॥१४॥

तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी।
शब्दाभिधेयालङ्कारभेदादिष्टं द्वयं तु नः॥१५॥

शब्दार्थौ सहितौ काव्यं गद्यं पद्यञ्च तद् द्विधा।
संस्कृतं प्राकृतञ्चान्यदपभ्रंश इति त्रिधा॥१६॥

वृत्तं देवादिचरितशंसि चोत्पाद्यवस्तु च।
कलाशास्त्राश्रयञ्चेति चतुर्धा भिद्यते पुनः॥१७॥

सर्गबन्धोऽभिनेयार्थं तथैवाख्यायिकाकथे।
अनिबद्धञ्च काव्यादि तत्पुनः पञ्चधोच्यते॥१८॥

सर्गबन्धो महाकाव्यं महताञ्च महच्च यत्।
अग्राम्यशब्दमर्थ्यञ्च सालंकारं सदाश्रयम्॥१९॥

मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्च यत्
पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत्॥२०॥

चतुर्वर्गाभिधानेऽपि भूयसार्थोपदेशकृत्।
युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक्॥२१॥

नायकं प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षाभिधित्सया॥२२॥

यदि काव्यशरीरस्य न स व्यापितयेष्यते।
न चाभ्युदयभाक्तस्य मुधादौ ग्रहणं स्तवे॥२३॥

नाटकं द्विपदीशम्यारासकस्कन्धकादि यत्।
उक्तं तदभिनेयार्थमुक्तोऽन्यैस्तस्य विस्तरः॥२४॥

संस्कृतानाकुलश्रव्यशब्दार्थपदवृत्तिना।
गद्येन युक्तोदात्तार्था सोच्छ्वासाख्यायिका मता॥२५॥

वृत्तमाख्यायते तस्यां नायकेन स्वचेष्टितम्
वक्त्रञ्चपरवक्त्रञ्च काले भाव्यर्थशंसि च॥२६॥

कवेरभिप्रायकृतैः कथनैः कैश्चिदङ्किता।
कन्याहरणसङ्ग्रामविप्रलम्भोदयान्विता॥२७॥

न वक्त्रापरवक्त्राभ्यां युक्ता नोच्छ्वासवत्यपि।
संस्कृताऽसंस्कृता चेष्टा कथापभ्रंशभाक्तथा॥२८॥

अन्यैः स्वचरितं तस्यां नायकेन तु नोच्यते।
स्वगुणाविष्कृतिं कुर्यादभिजातः कथं जनः॥२९॥

अनिबद्धं पुनर्गाथाश्लोकमात्रादि तत्पुनः।
युक्तं वक्रस्वभावोक्त्या सर्वमेवैतदिष्यते॥३०॥

वैदर्भमन्यदस्तीति मन्यन्ते सुधियोऽपरे।
तदेव च किल ज्यायः सदर्थमपि नापरम्॥३१॥

गौडीयमिदमेतत्तु वैदर्भमिति किं पृथक्।
गतानुगतिकन्यायान्नानाख्येयममेधसाम्॥३२॥

ननु चाश्मकवंशादि वैदर्भमिति कथ्यते।

कामं तथास्तु प्रायेण संज्ञेच्छातो विधीयते॥३३।

अपुष्टार्थमवक्रोक्ति प्रसन्नमृजु कोमलम्।
भिन्नं गेयमिवेदं तु केवलं श्रुतिपेशलम्॥३४॥

अलंकारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम्।
गौडीयमपि साधीयो वैदर्भमिति नान्यथा॥३५॥

न नितान्तादिमात्रेण जायते चारुता गिराम्।
वक्राभिधेयशब्दोक्तिरिष्टा वाचामलङ्कृतिः॥३६॥

नेयार्थं क्लिष्टमन्यार्थमवाचकमयुक्तिमत्
गूढशब्दाभिधानञ्च कवयो न प्रयुञ्जते॥३७॥

नेयार्थं नीयते युक्तो यस्यार्थः कृतिभिर्बलात्।
शब्दन्यायानुपारूढः कथञ्चित्स्वाभिसन्धिना॥३८॥

मायेव भद्रेति यथा सा चासाध्वी प्रकल्पना।
वेणुदाकेरिति च तां न यन्ति वचनाद् विना॥३९॥

क्लिष्टं व्यवहितं विद्यादन्यार्थं विगमे यथा।
विजह्रुस्तस्य ताः शोकं क्रीडायां विकृतञ्च तत्॥४०॥

हिमापहामित्रधरैर्व्याप्तं व्योमेत्यवाचकम्।
साक्षादरूढं वाच्येऽर्थे नाभिधानं प्रतीयते॥४१॥

अयुक्तिमद् यथा दूता जलभृन्मारुतेन्दवः।
तथा भ्रमरहारीतचक्रवाकशुकादयः॥४२॥

अवाचोऽव्यक्तवाचश्च दूरदेशविचारिणः।
कथं दूत्यं प्रपद्येरन्निति युक्त्या न युज्यते॥४३॥

यदि चोत्कण्ठया यत्तदुन्मत्त इव भाषते।
तथा भवतु भूम्नेदं सुमेधोभिः प्रयुज्यते॥४४॥

गूढशब्दाभिधानञ्च न प्रयोज्यं कथञ्चन।
सुधियामपि नैवेदमुपकाराय कल्पते॥४५॥

असितर्तितुगद्रिच्छित्स्वःक्षितां पतिरद्विदृक्।
अमिद्धिः शुभ्रदृग्दृष्टैर्द्विषो जेघ्नीयिषीष्ट वः॥४६॥

श्रुतिदुष्टार्थदुष्टे च कल्पनादुष्टमित्यपि।
श्रुतिकष्टं तथैवाहुर्वाचां दोषं चतुर्विधम्॥४७॥

विड्वर्चोविष्ठितक्लिन्नच्छिन्नवान्तप्रवृत्तयः।
प्रचारधर्षितोद्गारविसर्गहृदयन्त्रिताः॥४८॥

हिरण्यरेताः सम्बाधः पेलवोपस्थिताण्डजाः।
वाक्काटवादयश्चेति श्रुतिदुष्टा मताः गिरः॥४६॥

अर्थदुष्टं पुनर्ज्ञेयं यत्रोक्ते जायते मतिः।
असभ्यवस्तुविषया शब्दैस्तद्वाचिभिर्यथा॥५०॥

हन्तुमेव प्रवृत्तस्य स्तब्धस्य विवरैषिणः।
पतनं जायतेऽवश्यं कृच्छ्रेण पुनरुन्नतिः॥५१॥

पदद्वयस्य सन्धाने यदनिष्टं प्रकल्पते।
तदाहुः कल्पनादुष्टं स शौर्याभरणो यथा॥५२॥

यथाजिह्लदित्यादि श्रुतिकष्टञ्च तद्विदुः।
न तदिच्छन्ति कृतिनो गण्डमप्यपरे किल॥५३।

सन्निवेशविशेषात्तु दुरुक्तमपि शोभते।
नीलं पलाशमाबद्धमन्तराले स्रजामिव॥५४॥

किञ्चिदाश्रयसौन्दर्याद्धत्ते शोभामसाध्वपि।
कान्ताविलोचनन्यस्तं मलीमसमिवाञ्जनम्॥५५॥

आपाण्डुगण्डमेतत्ते वदनं वनजेक्षणे।

संगमात्पाण्डुशब्दस्य गण्डः साधु यथोदितः॥५६॥

अनयान्यदपि ज्ञेयं दिशा युक्तमसाध्वपि।
यथा विक्लिन्नगण्डानां करिणां मदवारिभिः॥५७॥

मदक्लिन्नकपोलानां द्विरदानां चतुश्शती।
यथा तद्वदसाधीयः साधीयश्च प्रयोजयेत्॥५८॥

एतद् ग्राह्यं सुरभि कुसुमं ग्राम्यमेतन्निधेयं
धत्ते शोभां विरचितमिदं स्थानमस्यैतदस्य।
मालाकारो रचयति यथा साधु विज्ञाय मालां
योज्यं काव्येष्ववहितधिया तद्वदेवाभिधानम्॥५९॥

॥ इति प्रथमः परिच्छेदः॥

## द्वितीयः परिच्छेदः

माधुर्यमभिवाञ्छन्तः प्रसादञ्च सुमेधसः।
समासवन्ति भूयांसि न पदानि प्रयुञ्जते॥१॥

केचिदोजोऽभिधित्सन्तः समस्यन्ति बहून्यपि।
यथा मन्दारकुसुमरेणुपिञ्जरितालका॥२॥

श्रव्यं नातिसमस्तार्थं काव्यं मधुरमिष्यते।
आविद्वदङ्गनाबालप्रतीतार्थं प्रसादवत्॥३॥

अनुप्रासः सयमको रूपकं दीपकोपमे।
इति वाचामलङ्काराः पञ्चैवान्यैरुदाहृताः॥४॥

सरूपवर्णविन्यासमनुप्रासं प्रचक्षते।
किन्तया चिन्तया कान्ते नितान्तेति यथोदितम्॥५॥

ग्राम्यानुप्रासमन्यत्तु मन्यन्ते सुधियोऽपरे।
स लोलमालालीनालिकुलाकुलगलो बलः॥६॥

नानार्थवन्तोऽनुप्रासा न चाप्यसदृशाक्षराः।
युक्त्यानया मध्यमया जायन्ते चारवो गिरः॥७॥

लाटीयमप्यनुप्रासमिहेच्छन्त्यपरे यथा।
दृष्टिं दृष्टिसुखां धेहि चन्द्रश्चन्द्रमुखोदितः॥८॥

आदिमध्यान्तयमकं पादाभ्यासं तथावली।
समस्तपादयमकमित्येतत्पञ्चधोच्यते॥९॥

सन्दष्टकसमुद्गादेरत्रैवान्तर्गतिर्मता।
आदौ मध्यान्तयोर्वा स्यादिति पञ्चैव तद्यथा॥१०॥

साधुना साधुना तेन राजता राजता भृता।
सहितं सहितं कर्त्तुं सङ्गतं सङ्गतं जनम्॥११॥

साधुः संसाराद् बिभ्यदस्मादसारात्
कृत्वा क्लेशान्तं याति वर्त्म प्रशान्तम्।
जातिं व्याधीनां दुर्दमानामधीनां
वाञ्छञ्ज्यायस्त्वं छिन्धि मुक्तानयस्त्वम्॥१२॥

न ते धीर्धीर भोगेषु रमणीयेषु संगता।
मुनीनपि हरन्त्येते रमणी येषु संगता॥१३॥

सितासिताक्षीं सुपयोधराधरां
सुसम्मदां व्यक्तमदां ललामदाम्।
घनाघनानीलघनाघनालकाम्
प्रियामिमामुत्सुकयन्ति यन्ति च॥१४॥

अमी नृपा दत्तसमग्रशासनाः
कदाचिदप्यप्रतिबद्धशासनाः।
कृतागसां मार्गभिदाञ्च शासनाः
पितृक्रमाध्यासितताद्दशासनाः॥१५॥

अनन्तरैकान्तरयोरेवं पादान्तयोरपि।
कृत्स्नं च सर्वपादेषु दुष्कृतं साधु ताद्दशम्॥१६॥

तुल्यश्रुतीनां भिन्नानामभिधेयैः परस्परम्।
वर्णानां यः पुनर्वादो यमकं तन्निगद्यते॥१७॥

प्रतीतशब्दमोजस्वि सुश्लिष्टपदसन्धि च।
प्रसादि स्वभिधानञ्च यमकं कृतिनां मतम्॥१८॥

नानाधात्वर्थगम्भीरा यमकव्यपदेशिनी।
प्रहेलिका सा ह्युदिता रामशर्माच्युतोत्तरे॥१९॥

काव्यान्यपि यदीमानि व्याख्यागम्यानि शास्त्रवत्।
उत्सवः सुधियामेव हन्त दुर्मेधसो हताः॥२०॥

उपमानेन यत्तत्त्वमुपमेयस्य रूप्यते।
गुणानां समतां दृष्ट्वा रूपकं नाम तद्विदुः॥२१॥

समस्तवस्तुविषयमेकदेशविवर्ति च।
द्विधा रूपकमुद्दिष्टमेतत्तच्चोच्यते यथा॥२२॥

शीकराम्भोमदसृजस्तुङ्गा जलददन्तिनः।
निर्यान्तो मदयन्तीमे शक्रकार्मुकवारणाः॥२३॥

तडिद्वलयकक्ष्याणां बलाकामालभारिणाम्।
पयोमुचां ध्वनिर्धीरो दुनोति मम तां प्रियाम्॥२४॥

आदिमध्यान्तविषयं त्रिधा दीपकमिष्यते।
एकस्यैव त्र्यवस्थत्वादिति तद् भिद्यते त्रिधा॥२५॥

अमूनि कुर्वतेऽन्वर्थामस्याख्यामर्थदीपनात्।
त्रिभिर्निदर्शनैश्चेदं त्रिधा निर्दिश्यते यथा॥२६॥

मदो जनयति प्रीतिं साऽनङ्गं मानभङ्गुरम्।
स प्रियासङ्गमोत्कण्ठां सासह्यां मनसश्शुचम्॥२७॥

मालिनीरंशुकभृतः स्त्रियोऽलंकुरुते मधुः।
हारीतशुकवाचश्च भूधराणामुपत्यकाः॥२८॥

चीरीमतीररण्यानीः सरितश्शुष्यदम्भसः।
प्रवासिनाञ्च चेतांसि शुचिरन्तं निनीषति॥२९॥

विरुद्धेनोपमानेन देशकालक्रियादिभिः।
उपमेयस्य यत्साम्यं गुणलेशेन सोपमा॥३०॥

यथेवशब्दौ सादृश्यमाहतुर्व्यतिरेकिणोः।
दूर्वाकाण्डमिव श्यामं तन्वी श्यामा लता यथा॥३१॥

विना यथेवशब्दाभ्यां समासाभिहिता परा।
यथा कमलपत्राक्षी शशाङ्कवदनेति च॥३२॥

वतिनापि क्रियासाम्यं तद्वदेवाभिधीयते।
द्विजातिवदधीतेऽसौ गुरुवच्चानुशास्ति नः॥३३॥

समानवस्तुन्यासेन प्रतिवस्तूपमोच्यते।
यथेवानभिधानेऽपि गुणसाम्यप्रतीतितः॥३४॥

साधुसाधारणत्वादिर्गुणोऽत्र व्यतिरिच्यते।
स साम्यमापादयति विरोधेऽपि तयोर्यथा॥३५॥

कियन्तः सन्ति गुणिनः साधुसाधारणश्रियः।
स्वादुपाकफलानम्राः कियन्तो वाध्वशाखिनः॥३६॥

यदुक्तं त्रिप्रकारत्वं तस्याः कैश्चिन्महात्मभिः।
निन्दाप्रशंसाचिख्यासाभेदादत्राभिधीयते॥३७॥

सामान्यगुणनिर्देशात्त्रयमप्युदितं ननु।
मालोपमादिः सर्वोऽपि न ज्यायान्विस्तरो मुधा॥३८॥

हीनताऽसम्भवो लिङ्गवचोभेदो विपर्ययः।
उपमानाधिकत्वञ्च तेनासदृशतापि च॥३९॥

त एत उपमादोषाः सप्त मेधाविनोदिताः।
सोदाहरणलक्ष्माणो वर्ण्यन्तेऽत्र च ते पृथक्॥४०॥

स मारुताकम्पितपीतवासाः
बिभ्रत्सलीलं शशिभासमब्जम्।
यदुप्रवीरः प्रगृहीतशाङ्र्गः
सेन्द्रायुधो मेघ इवाबभासे॥४१॥

शक्रचापग्रहादत्र दर्शितं किल कार्मुकम्।
वासश्शङ्खानुपादानाद्धीनमित्यभिधीयते॥४२॥

सर्वसर्वेण सारूप्यं नास्ति भावस्य कस्यचित्।
यथोपपत्ति कृतिभिपरुमासु प्रयुज्यते॥४३॥

अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति।
यत्किञ्चित्कान्तिसामान्याच्छशिनैवोपमीयते॥४४॥।

किञ्च काव्यानि नेयानि लक्षणेन महात्मनाम्।
दृष्टं वा सर्वसारूप्यं राजमित्रे यथोदितम्॥४५॥

सूर्यांशुसम्मीलितलोचनेषु दीनेषु पद्मानिलनिर्मदेषु।
साध्व्यः स्वगेहेष्विव भर्तृहीनाः केका विनेशुः शिखिनां मुखेषु॥४६॥

निष्पेतुरास्यादिव तस्य दीप्ताः शरा धनुर्मण्डलमध्यभाजः।
जाज्वल्यमाना इव वारिधाराः दिनार्द्धभाजः परिवेषिणोऽर्कात्॥४७॥

कथं पातोऽम्बुधाराणां ज्वलन्तीनां विवस्वतः।
असम्भवादयं युक्त्या तेनासम्भव उच्यते॥४८॥

तत्रासम्भविनार्थेन कः कुर्यादुपमां कृती।
को नाम वह्निनौपम्यं कुर्वीत शशलक्ष्मणः॥४९॥

यस्यातिशयवानर्थः कथं सोऽसम्भवो मतः।
इष्टञ्चातिशयार्थत्वमुपमोत्प्रेक्षयोर्यथा॥५०॥

पुञ्जीभूतमिव ध्वान्तमेष भाति मतंगजः।
सरः शरत्प्रसन्नाम्भो नभःखण्डमिवोज्झितम्॥५१॥

अथ लिंगवचोभेदावुच्येते सविपर्ययौ।
हीनाधिकत्वात्स द्वेधा त्रयमप्युच्यते यथा॥५२॥

अविगाह्योऽसि नारीणामनन्यमनसामपि।
विषमोपलभिन्नोर्मिरापगेवोत्तितीर्षतः॥५३॥

क्वचिदग्रे प्रसरता क्वचिदापत्य निघ्नता।

शुनेव सारंगकुलं त्वया भिन्नं द्विषां बलम्॥५४॥

अयं पद्मासनासीनश्चक्रवाको विराजते।
युगादौ भगवान् ब्रह्मा विनिर्मित्सुरिव प्रजाः॥५५॥

ननूपमीयते पाणिः कमलेन विकासिना।
अधरो विद्रुमच्छेदभासा बिम्बफलेन च ॥५६॥

उच्यते काममस्तीदं किन्तु स्त्रीपुंसयोरयम्।
विधिर्नाभिमतोऽन्यैस्तु त्रयाणामपि नेष्यते॥५७॥

स पीतवासाः प्रगृहीतशार्ङ्गो मनोज्ञभीमं वपुराप कृष्णः।
शतह्रदेन्द्रायुधवान्निशायां संसृज्यमानश्शशिनेव मेघः॥५८॥

शशिनो ग्रहणादेतदाधिक्यं किल न ह्ययम्।
निर्दिष्ट उपमेयेऽर्थे वाच्यो वा जलजोऽत्र तु॥५९॥

न सर्वसारूप्यमिति विस्तरेणोदितो विधिः।
अभिप्रायात्कवेर्नात्र विधेया जलजे मतिः॥६०॥

आधिक्यमुपमानानां न्याय्यं नाधिकता भवेत्।
गोक्षीरकुन्दहलिनां विशुद्ध्या सदृशं यशः॥६१॥

एकेनैवोपमानेन ननु सादृश्यमुच्यते।
उक्तार्थस्य प्रयोगो हि गुरुमर्थं न पुष्यति॥६२॥

वनेऽथ तस्मिन्वनितानुयायिनः
प्रवृत्तदानार्द्रकटा मतंगजाः।
विचित्रबर्हाभरणाश्च बर्हिणो
बभुर्दिवीवामलविग्रहा ग्रहाः॥६३॥

ग्रहैरपि गजादीनां यदि सादृश्यमुच्यते।
तथापि तेषां तैरस्ति कान्तिर्वाप्युग्रतापि वा॥६४॥

इत्युक्त उपमाभेदो वक्ष्यते चापरः पुनः।
उपमादेरलंकाराद् विशेषोऽन्योऽभिधीयते॥६५॥

आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना।
समासातिशयोक्ती च षडलंकृतयोऽपराः॥६६॥

वक्ष्यमाणोक्तविषयस्तत्राक्षेपो द्विधा मतः।
एकरूपतया शेषा निर्देक्ष्यन्ते यथाक्रमम्॥६७॥

प्रतिषेध इवेष्टस्य यो विशेषाभिधित्सया।
आक्षेप इति तं सन्तः शंसन्ति द्विविधं यथा॥६८॥

अहं त्वां यदि नेक्षेय क्षणमप्युत्सुका ततः।
इयदेवास्त्वतोऽन्येन किमुक्तेनाप्रियेण ते॥६९॥

स्वविक्रमाकान्तभुवश्चित्रं यन्न तवोद्धतिः।
को वा हेतुरलं सिन्धोर्विकारकरणं प्रति॥७०॥

उपन्यसनमन्यस्य यदर्थस्योदितादृते।
ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो यदि॥७१॥

परानीकानि भीमानि विवक्षोर्न तव व्यथा।
साधु वासाधु वाऽऽगामि पुंसामात्मैव शंसति ॥७२॥

हि शब्देनापि हेत्वर्थप्रथनादुक्तसिद्धये।
अयमर्थान्तरन्यासः सुतरां व्यज्यते यथा॥७३॥

वहन्ति गिरयो मेघानभ्युपेतान्गुरूनपि।
गरीयानेव हि गुरून्बिभर्ति प्रणयागतान्॥७४॥

उपमानवतोऽर्थस्य यद्विशेषनिदर्शनम्।
व्यतिरेकं तमिच्छन्ति विशेषापादनाद्यथा॥७५॥

सितासिते पक्ष्मवती नेत्रे ते ताम्रराजिनी।

एकान्तशुभ्रश्यामे तु पुण्डरीकासितोत्पले॥७६॥

क्रियायाः प्रतिषेधे या तत्फलस्य विभावना।
ज्ञेया विभावनैवासौ समाधौ सुलभे सति॥७७॥

अपीतमत्ताः शिखिनो दिशोऽनुत्कण्ठिताकुलाः।
नीपोऽविलिप्तसुरभिरभ्रष्टकलुषं जलम्॥७८॥

यत्रोक्ते गम्यतेऽन्योऽर्थस्तत्समानविशेषणः।
सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया यथा॥७९॥

स्कन्धवानृजुरव्यालः स्थिरोऽनेकमहाफलः।
जातस्तरुरयञ्चोच्चैः पातितश्च नभस्वता॥८०॥

निमित्ततो वचो यत्तु लोकातिक्रान्तगोचरम्।
मन्यन्तेऽतिशयोक्तिं तामलंकारतया यथा॥८१॥

स्वपुष्पच्छविहारिण्या चन्द्रभासा तिरोहिताः।
अन्वमीयन्त भृंगालिवाचा सप्तच्छदद्रुमाः॥६२॥

अपां यदि त्वक् शिथिला च्युता स्यात्फणिनामिव।
तदा शुक्लांशुकानि स्युरंगेष्वम्भसि योषिताम्।८३।

इत्येवमादिरुदिता गुणातिशययोगतः।
सर्वैवातिशयोक्तिस्तु तर्कयेत्तां यथागमम्॥८४॥

सैषा सर्वैव वक्रोक्तिरनयार्थो विभाव्यते।
यत्नोऽस्यां कविना कार्यः कोऽलंकारोऽनया विना॥८५॥

हेतुश्च सूक्ष्मो लेशोऽथ नालंकारतया मतः।
समुदायाभिधानस्य वक्रोक्त्यनभिधानतः॥८६॥

गतोऽस्तमर्को भातीन्दुर्यान्ति वासाय पक्षिणः।
इत्येवमादि किं काव्यं वार्त्तामेनां प्रचक्षते॥८७॥

यथासङ्ख्यमथोत्प्रेक्षामलङ्कारद्वयं विदुः।
सङ्ख्यानमिति मेधावी नोत्प्रेक्षाभिहिता क्वचित्॥८८॥

भूयसामुपदिष्टानामर्थानामसधर्मणाम्।
क्रमशो योऽनुनिर्देशो यथासङ्ख्यं तदुच्यते॥८९॥

पद्मेन्दुभृङ्गमातङ्गपुंस्कोकिलकलापिनः।
वक्त्रकान्तीक्षणगतिवाणीबालैस्त्वया जिताः॥९०॥

अविवक्षितसामान्या किञ्चिच्चोपमया सह।
अतद्गुणक्रियायोगादुत्प्रेक्षातिशयान्विता॥९१॥

किंशुकव्यपदेशेन तरुमारुह्य सर्वतः।
दग्धादग्धमरण्यान्याः पश्यतीव विभावसुः ॥९२॥

स्वाभावोक्तिरलंकार इति केचित्प्रचक्षते।
अर्थस्य तदवस्थत्वं स्वभावोऽभिहितो यथा॥९३॥

आक्रोशन्नाह्वयन्नन्यानाधावन्मण्डलैर्नुदन्।
गा वारयति दण्डेन डिम्भः शस्यावतारणीः॥९४॥

समासेनोदितमिदं धीखेदायैव विस्तरः।
असङ्गृहीतमप्यन्यदभ्यूह्यमनया दिशा॥९५॥

स्वयङ्कृतैरेव निदर्शनैरियं मया
प्रक्लृप्ता खलु वागलङ्कृतिः।
अतः परञ्चारुरनेकधापरो
गिरामलंकारविधिर्विधास्यते॥९६॥

॥ इति द्वितीयः परिच्छेदः॥

## तृतीयः परिच्छेदः

प्रेयो रसवदूर्जस्वि पर्यायोक्तं समाहितम्।
द्विप्रकारमुदात्तञ्च भेदैः श्लिष्टमपि त्रिभिः॥१॥

अपह्नुतिं विशेषोक्तिं विरोधं तुल्ययोगिताम्।
अप्रस्तुतप्रशंसाञ्च व्याजस्तुतिनिदर्शने॥२॥

उपमारूपकञ्चान्यदुपमेयोपमामपि।
सहोक्तिपरिवृत्ती च ससन्देहमनन्वयम्॥३॥

उत्प्रेक्षावयवञ्चान्ये संसृष्टिमपि चापरे।
भाविकत्वञ्च निजगुरलंकारं सुमेधसः॥४॥

प्रेयो गृहागतं कृष्णमवादीद् विदुरो यथा।
अद्य या मम गोविन्द जाता त्वयि गृहागते।
कालेनैषा भवेत् प्रीतिस्तवैवागमनात् पुनः॥५॥

रसवद् दर्शितस्पष्टशृंगारादिरसं यथा।
देवी समागमद्धर्ममस्करिण्यतिरोहिता॥६॥

ऊर्जस्वि कर्णेन यथा पार्थाय पुनरागतः।
द्विः सन्दधाति किं कर्णः शल्येत्यहिरपाकृतः॥७॥

पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते।
उवाच रत्नाहरणे चैद्यं शाङ्र्गधनुर्यथा॥८॥

गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः।
न भुञ्जते द्विजास्तच्च रसदाननिवृत्तये॥९॥

समाहितं राजमित्रे यथा क्षत्रिययोषिताम्।
रामप्रसत्त्यै यान्तीनां पुरोऽदृश्यत नारदः॥१०॥

उदात्तं शक्तिमान्रामो गुरुवाक्यानुरोधकः।

विहायोपनतं राज्यं यथा वनमुपागमत्॥११॥

एतदेवापरेऽन्येन व्याख्यानेनान्यथा विदुः।
नानारत्नादियुक्तं यत्तत्किलोदात्तमुच्यते॥१२॥

चाणक्यो नक्तमुपयान्नन्दक्रीडागृहं यथा।
शशिकान्तोपलच्छन्नं विवेद पयसां कणैः॥१३।

उपमानेन यत्तत्त्वमुपमेयस्य साध्यते।
गुणक्रियाभ्यां नाम्ना च श्लिष्टं तदभिधीयते॥१४॥

लक्षणं रूपकेऽपीदं लक्ष्यते काममत्र तु।
इष्टः प्रयोगो युगपदुपमानोपमेययोः॥१५॥

शीकराम्भोमदसृजस्तुंगा जलददन्तिनः।
इत्यत्र मेघकरिणां निर्देशः क्रियते समम्॥१६॥

श्लेषादेवार्थवचसोरस्य च क्रियते भिदा।
तत्सहोक्त्युपमाहेतुनिर्देशात्त्रिविधं यथा॥१७॥

छायावन्तो गतव्यालाः स्वारोहाः फलदायिनः।
मार्गद्रुमा महान्तश्च परेषामेव भूतये॥१८॥

उन्नता लोकदयिता महान्तः प्राज्यवर्षिणः।
शमयन्ति क्षितेस्तापं सुराजानो घना इव॥१९॥

रत्नवत्त्वादगाधत्वात्स्वमर्यादाविलंघनात्।
बहुसत्त्वाश्रयत्वाच्च सदृशस्त्वमुदन्वता॥२०॥

अपह्नुतिरभीष्टा च किञ्चिदन्तर्गतोपमा।
भूतार्थापह्नवादस्याः क्रियते चाभिधा यथा॥२१॥

नेयं विरौति भृंगाली मदेन मुखरा मुहुः।
अयमाकृष्यमाणस्य कन्दर्पधनुषो ध्वनिः॥२२॥

एकदेशस्य विगमे या गुणान्तरसंस्थितिः।
विशेषप्रथनायासौ विशेषोक्तिर्मता यथा ॥२३॥

स एकस्त्रीणि जयति जगन्ति कुसुमायुधः।
हरतापि तनुं यस्य शम्भुना न हृतं बलम्॥२४॥

गुणस्य वा क्रियाया वा विरुद्धान्यक्रियाभिधा।
या विशेषाभिधानाय विरोधं तं विदुर्यथा॥२५॥

उपान्तरूढोपवनच्छायाशीतापि भूरसौ।
विदूरदेशानपि वः सन्तापयति विद्विषः॥२६॥

न्यूनस्यापि विशिष्टेन गुणसाम्यविवक्षया।
तुल्यकार्यक्रियायोगादित्युक्ता तुल्ययोगिता॥२७॥

शेषो हिमगिरिस्त्वञ्च महान्तो गुरवः स्थिराः।
यदलंघितमर्यादाश्चलन्तीं बिभृथ क्षितिम्॥२८॥

अधिकारादपेतस्य वस्तुनोऽन्यस्य या स्तुतिः।
अप्रस्तुतप्रशंसेति सा चैवं कथ्यते यथा॥२९॥

प्रीणितप्रणयि स्वादु काले परिणतं बहु।
विना पुरुषकारेण फलं पश्यत शाखिनाम्॥३०॥

दूराधिकगुणस्तोत्रव्यपदेशेन तुल्यताम्।
किञ्चिद्विधित्सोर्या निन्दा व्याजस्तुतिरसौ यथा ॥३१॥

रामः सप्ताभिनत्सालान् गिरिं क्रौञ्चं भृगूत्तमः।
शतांशेनापि भवता किं तयोः सदृशं कृतम्॥३२॥

क्रिययैव विशिष्टस्य तदर्थस्योपदर्शनात्।

ज्ञेया निदर्शना नाम यथेववतिभिर्विना॥३३।

अयं मन्दद्युतिर्भास्वानस्तं प्रति यियासति।
उदयः पतनायेति श्रीमतो बोधयन्नरान्॥३४॥

उपमानेन तद्भावमुपमेयस्य साधयन्।
यो वदत्युपमामेतदुपमारूपकं यथा॥३५॥

समग्रगगनायाममानदण्डो रथांगिनः।
पादो जयति सिद्धस्त्रीमुखेन्दुनवदर्पणः॥३६॥

उपमानोपमेयत्वं यत्र पर्यायतो भवेत्।
उपमेयोपमां नाम ब्रुवते तां यथोदिताम्॥३९॥

सुगन्धि नयनानन्दि मदिरामदपाटलम्।
अम्भोजमिव वक्त्रं ते त्वदास्यमिव पंकजम्॥३८॥

तुल्यकाले क्रिये यत्र वस्तुद्वयसमाश्रये।
पदेनैकेन कथ्येते सहोक्तिः सा मता यथा॥३९॥

हिमपाताविलदिशो गाढालिंगनहेतवः।
वृद्धिमायान्ति यामिन्यः कामिनां प्रीतिभिः सह॥४०।

विशिष्टस्य यदादानमन्यापोहेन वस्तुनः।
अर्थान्तरन्यासवती परिवृत्तिरसौ यथा॥४१॥

प्रदाय वित्तमर्थिभ्यः स यशोधनमादित।
सतां विश्वजनीनानामिदमस्खलितं व्रतम्॥४२॥

उपमानेन तत्त्वञ्च भेदञ्च वदतः पुनः।
ससन्देहं वचः स्तुत्यै ससन्देहं विदुर्यथा॥४३॥

किमयं शशी न स दिवा विराजते
कुसुमायुधो न धनुरस्य कौसुमम्।

इति विस्मयाद् विमृशतोऽपि मे मति-
स्त्वयि वीक्षिते न लभतेऽर्थनिश्चयम्॥४४॥

यत्र तेनैव तस्य स्यादुपमानोपमेयता।
असादृश्यविविक्षातस्तमित्याहुरनन्वयम्॥४५॥

ताम्बूलरागवलयं स्फुरद्दशनदीधिति।
इन्दीवराभनयनं तवेव वदनं तव॥४६॥

श्लिष्टस्यार्थेन संयुक्तः किञ्चिदुत्प्रेक्षयान्वितः।
रूपकार्थेन च पुनरुत्प्रेक्षावयवो यथा॥४७॥

तुल्योदयावसानत्वाद् गतेऽस्तं प्रति भास्वति।
वासाय वासरः क्लान्तो विशतीव तमोगृहम्॥४८॥

वरा विभूषा संसृष्टिर्बह्वलंकारयोगतः।
रचिता रत्नमालेव सा चैवमुदिता यथा॥४९॥

गाम्भीर्यलाघववतोर्युवयोः प्राज्यरत्नयोः।
सुखसेव्यो जनानां त्वं दुष्टग्राहोऽम्भसां पतिः॥५०।

अनलङ्कृतकान्तं ते वदनं वनजद्युति।
निशाकृतः प्रकृत्यैव चारोः का वास्त्यलङ्कृतिः॥५२॥

अन्येषामपि कर्तव्या संसृष्टिरनया दिशा।
कियदुद्घट्टितज्ञेभ्यः शक्यं कथयितुं मया॥५२॥

भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम्।
प्रत्यक्षा इव दृश्यन्ते यत्रार्था भूतभाविनः॥५३॥

चित्रोदात्ताद्भुतार्थत्वं कथायाः स्वभिनीतता।
शब्दानाकुलता चेति तस्य हेतुं प्रचक्षते॥५४॥

आशीरपि च केषाञ्चिदलंकारतया मता।
सौहृदस्य विरोधोक्तौ प्रयोगोऽस्याश्च तद्यथा॥५५॥

अस्मिञ्जहीहि सुहृदि प्रणयाभ्यसूया-
माश्लिष्य गाढममुमानतमादरेण।
विन्ध्यं महानिव घनः समयेऽभिवर्ष-
न्नानन्दजैर्नयनवारिभिरुक्षतु त्वाम्॥५६॥

मदान्धमातंगविभिन्नसाला हतप्रवीरा द्रुतभीतपौराः।
त्वत्तेजसा दग्धसमस्तशोभा द्विषां पुरः पश्यतु राजलोकः॥५७॥

गिरामलंकारविधिः सविस्तरः स्वयं विनिश्चित्य धिया मयोदितः।
अनेन वागर्थविदामलंकृता विभाति नारीव विदग्धमण्डना॥५८॥

॥ इति तृतीयः परिच्छेदः॥

## चतुर्थः परिच्छेदः

अपार्थं व्यर्थमेकार्थं ससंशयमपक्रमम्।
शब्दहीनं यतिभ्रष्टं भिन्नवृत्तं विसन्धि च॥१॥

देशकालकलालोकन्यायागमविरोधि च।
प्रतिज्ञाहेतुदृष्टान्तहीनं दुष्टञ्च नेष्यते॥२॥

अपार्थमित्यपेतार्थं स चार्थः पदवाक्ययोः।
अर्थवान्वर्णसङ्घातः सुप्तिङन्तं पदं पुनः॥३॥

पदानामेव सङ्घातः सापेक्षाणां परस्परम्।
निराकाङ्क्षञ्च तद्वाक्यमेकवस्तुनिबन्धनम्॥४॥

क्रमवृत्तिषु वर्णेषु सङ्घातादि न युज्यते।
बुद्धौ तु सम्भवत्येतदन्यत्वेऽपि प्रतिक्षणम्॥५॥

धीरन्त्यशब्दविषया वृत्तवर्णाहितस्मृतिः।
वाक्यमित्याहुरपरे न शब्दाः क्षणनश्वराः॥६॥

अत्रापि बहु वक्तव्यं जायते तत्तु नोदितम्।
गुरुभिः किं विवादेन यथाप्रकृतमुच्यते॥७॥

समुदायार्थशून्यं यत्तदपार्थकमिष्यते।
दाडिमानि दशापूपाः षडित्यादि यथोदितम्॥८॥

विरुद्धार्थं मतं व्यर्थं विरुद्धं तूपदिश्यते।
पूर्वापरार्थव्याघाताद् विपर्ययकरं यथा॥९॥

सखि मानं प्रिये धेहि लघुतामस्य मा गमः।
भर्त्तुश्छन्दानुवर्त्तिन्यः प्रेम घ्नन्ति न हि स्त्रियः॥१०॥

उपासितगुरुत्वात्त्वं विजितेन्द्रियशत्रुषु।
श्रेयःसु विनयाधानमधुनातिष्ठ केवलम्॥११॥

यदभिन्नार्थमन्योन्यं तदेकार्थं प्रचक्षते।
पुनरुक्तमिदं प्राहुरन्ये शब्दार्थभेदतः॥१२॥

न शब्दपुनरुक्तं तु स्थौल्यादत्रोपवर्ण्यते।
कथमाक्षिप्तचित्तः सन्नुक्तमेवाभिधास्यते॥१३॥

भयशोकाभ्यसूयासु हर्षविस्मययोरपि।
यथाह गच्छ गच्छेति पुनरुक्तं न तद्विदुः॥१४॥

अत्रार्थपुनरुक्तं यत्तदेवैकार्थमिष्यते।
उक्तस्य पुनराख्याने कार्यासम्भवतो यथा॥१५॥

तामुत्कमनसं नूनं करोति ध्वनिरम्भसाम्।
सौधेषु घनमुक्तानां प्रणालीमुखपातिनाम्॥१६॥

श्रुतेः सामान्यधर्माणां विशेषस्यानुदाहृतेः।
अप्रतिष्ठं यदेकत्र तज्ज्ञानं संशयं विदुः॥१७॥

ससंशयमिति प्राहुस्ततस्तज्जननं वचः।
इष्टं निश्चितये वाक्यं न दोलायेत तद्यथा॥१८॥

व्यालवन्तो दुरारोहा रत्नवन्तः फलान्विताः।
विषमा भूभृतस्तेभ्यो भयमाशु प्रमादिनाम्॥१९॥

यथोपदेशं क्रमशो निर्देशोऽत्र क्रमो मतः।
तदपेतं विपर्यासादित्याख्यातमपक्रमम्॥२०॥

विदधानो किरीटेन्दू श्यामाभ्रहिमसच्छवी।
रथांगशूले बिभ्राणौ पातां वः शम्भुशार्ङ्गिणौ॥२१॥

सूत्रकृत्पदकारेष्टप्रयोगाद् योऽन्यथा भवेत्।
तमाप्तश्रावकासिद्धेः शब्दहीनं विदुर्यथा॥२२॥

स्फुरत्तडिद्वलयिनो विततास्भोगरीयसः।

तेजस्तिरयतः सौरं घनान्पश्य दिवोऽभितः॥२३॥

यतिश्छन्दोऽधिरूढानां शब्दानां या विचारणा।
तदपेतं यतिभ्रष्टमिति निर्दिश्यते यथा॥२४॥

विद्युत्वन्तस्तमालासितवपुष इमे वारिवाहा ध्वनन्ति॥२५॥

गुरोर्लघोश्च वर्णस्य योऽस्थाने रचनाविधिः।
तन्न्यूनाधिकता वापि भिन्नवृत्तमिदं यथा॥२६॥

भ्रमति भ्रमरमाला काननेषून्मदाऽसौ।
विरहितरमणीकोऽर्हस्यद्य गन्तुम्॥२७॥

कान्ते इन्दुशिरोरत्ने आदधाने उदंशुनी।
पातां वः शम्भुशर्वाण्याविति प्राहुर्विसन्ध्यदः॥२८॥

या देशे द्रव्यसम्भूतिरपि वा नोपदिश्यते।
तत्तद्विरोधि विज्ञेयं स्वभावात्तद्यथोच्यते॥२९॥

मलये कन्दरोपान्तरूढकालागुरुद्रुमे।
सुगन्धि कुसुमानभ्रा राजन्ते देवदारवः॥३०॥

षण्णामृतूनां भेदेन कालः षोढेव भिद्यते।
तद्विरोधकृदित्याहुर्विपर्यासादिदं यथा॥३१॥

उदूढशिशिरासारान्प्रावृषेण्यान्नभस्वतः।
फुल्लाः सुरभयन्तीमे चूताः काननशोभिनः॥३२॥

कला संकलना प्रज्ञा शिल्पान्यस्याश्च गोचरः।
विपर्यस्तं तथैवाहुस्तद्विरोधकरं यथा॥३३॥

ऋषभात्पञ्चमस्तस्मात्सषड्जं धैवतं स्मृतम्।
अयं हि मध्यमग्रामो मध्यमोत्पीडितर्षभः॥३४॥

इति साधारितं मोहादन्यथैवावगच्छति।
अन्यास्वपि कलास्वेवमभिधेया विरोधिता॥३५॥

स्थास्नुजंगमभेदेन लोकं तत्त्वविदो विदुः।
स च तद्व्यवहारोऽत्र तद्विरोधकरं यथा॥३६॥

तेषां कटतटभ्रष्टैर्गजानां मदबिन्दुभिः।
प्रावर्त्तत नदी घोरा हस्त्यश्वरथवाहिनी॥३७॥

धावतां सैन्यवाहानां फेनवारिमुखच्युतम्।
चकार जानुदघ्नापान् प्रतिदिङ्मुखमध्वनः॥३८॥

न्यायः शास्त्रं त्रिवर्गोक्तिर्दण्डनीतिञ्च तां विदुः।
अतो न्यायविरोधीष्टमपेतं यत्तया यथा॥३९॥

विजिगीषुमुपन्यस्य वत्सेशं वृद्धदर्शनम्।
तस्यैव कृतिनः पश्चादभ्यधाच्चारशून्यताम्॥४०॥

अन्तर्योधशताकीर्णं सालङ्कायननेतृकम्
तथाविधं गजच्छद्म नाज्ञासीत्स स्वभूगतम्॥४१॥

यदि वोपेक्षितं तस्य सचिवैः स्वार्थसिद्धये।
अहो नु मन्दिमा तेषां भक्तिर्वा नास्ति भर्त्तरि॥४२॥

शरा दृढधनुर्मुक्ता मन्युमद्भिररातिभिः।
मर्माणि परिहृत्यास्य पतिष्यन्तीति काऽनुमा॥४३॥

हतोऽनेन मम भ्राता मम पुत्रः पिता मम।
मातुलो भागिनेयश्च रुषा संरब्धचेतसः॥४४॥

अस्यन्तो विविधान्याजावायुधान्यपराधिनम्।
एकाकिनमरण्यान्यां न हन्युर्बहवः कथम्॥४५॥

नमोऽस्तु तेभ्यो विद्वद्भ्यो येऽभिप्रायं कवेरिमम्।

शास्त्रलोकावपास्यैवं नयन्ति नयवेदिनः॥४६॥

सचेतसो वनेभस्य चर्मणा निर्मितस्य च।
विशेषं वेद बालोऽपि कष्टं किन्नु कथन्नु तत्॥४७॥

आगमो धर्मशास्त्राणि लोकसीमा च तत्कृता।
तद्विरोधि तदाचारव्यतिक्रमणतो यथा॥४८॥

भूभृतां पीतसोमानां न्याय्ये वर्त्मनि तिष्ठताम्।
अलंकरिष्णुना वंशं गुरौ सति जिगीषुणा॥४९॥

अभार्योढेन संस्कारमन्तरेण द्विजन्मना।
नरवाहनदत्तेन वेश्यावान् निशि पीडितः।५०।

न दूषणायायमुदाहृतो विधि-
र्न चाभिमानेन किमु प्रतीतये।
कृतात्मनां तत्त्वदृशाञ्च मादृशो
जनोऽभिसन्धिं क इवावभोत्स्यते॥५१॥

॥इति चतुर्थः परिच्छेदः॥

## पञ्चमः परिच्छेद

अथ प्रतिज्ञाहेत्वादिहीनं दुष्टञ्च वर्ण्यते।
समासेन यथान्यायं तन्मात्रार्थप्रतीतये॥१॥

प्रायेण दुर्बोधतया शास्त्राद् बिभ्यत्यमेधसः।
तदुपच्छन्दनायैष हेतुन्यायलवोच्चयः॥२॥

स्वादुकाव्यरसोन्मिश्रं शास्त्रमप्युपयुञ्जते।
प्रथमालीढमधवः पिबन्ति कटु भेषजम्॥३॥

न स शब्दो न तद् वाच्यं न स न्यायो न सा कला।
जायते यन्न काव्यांगमहो भारो महान् कवेः॥४॥

सत्त्वादयः प्रमाणाभ्यां प्रत्यक्षमनुमा च ते।
असाधारणसामान्यविषयत्वं तयोः किल॥५॥

प्रत्यक्षं कल्पनापोढं ततोऽर्थादिति केचन।
कल्पनां नामजात्यादियोजनां प्रतिजानते॥६॥

समारोपः किलैतावान् सदर्थालम्बनञ्च तत्।
जात्याद्यपोहे वृत्तिः क्व क्व विशेषः कुतश्च सः॥७॥

तदपोहेषु च तथा सिद्धा सा बुद्धिगोचरा।
अवस्तुकञ्चेद्वितथं प्रत्यक्षं तत्त्ववृत्ति हि॥८॥

ग्राह्यग्राहकभेदेन विज्ञानांशो मतो यदि।
विज्ञानमात्रसादृश्याद् विशेषोऽस्य विकल्पना॥९॥

अर्थादेवेति रूपादेस्तत एवेति नान्यतः।
अन्यथा घटविज्ञानमन्येन व्यपदिश्यते॥१०॥

त्रिरूपाल्लिंगतो ज्ञानमनुमानञ्च केचन।
तद्विदो नान्तरीयार्थदर्शनञ्चापरे विदुः॥११॥

विविधास्पदधर्मेण धर्मी कृतविशेषणः।
पक्षस्तस्य च निर्देशः प्रतिज्ञेत्यभिधीयते॥१२।

तदर्थहेतुसिद्धान्तसर्वागमविरोधिनी।
प्रसिद्धधर्मा प्रत्यक्षबाधिनी चेति दुष्यति॥१३॥

तयैव हि तदर्थस्य विरोधकरणं यथा।
यतिर्मम पिता बाल्यात्सूनुर्यस्याहमौरसः॥१४॥

अस्त्यात्मा प्रकृतिर्वेति ज्ञेया हेत्वपवादिनी।
धर्मिणोऽस्याप्रसिद्धत्वात्तद्धर्मोऽपि न सेत्स्यति॥१५॥

शाश्वतोऽशाश्वतो वेति प्रसिद्धे धर्मिणि ध्वनौ।
जायते भेदविषयो विवादो वादिनोर्मिथः॥२६॥

स्वसिद्धान्तविरोधित्वाद्विज्ञेया तद्विरोधिनी।
कणभक्षो यथा शब्दमाचक्षीताविनश्वरम्॥१७॥

सर्वशास्त्रविरुद्धत्वात्सर्वागमविरोधिनी।
यथा शुचिस्तनुस्त्रीणि प्रमाणानि, न सन्ति वा॥१८॥

आकुमारमसन्दिग्धधर्माहितविशेषणा।
प्रसिद्धधर्मेति मता श्रोत्रग्राह्यो ध्वनिर्यथा॥१९॥

प्रत्यक्षबाधिनी तेन प्रमाणेनैव बाध्यते।
यथा शीतोऽनलो नास्ति रूपमुष्णः क्षपाकरः॥२०॥

सन्द्वयोः सदृशे सिद्धो व्यावृत्तस्तद्विपक्षतः।
हेतुस्त्रिलक्षणो ज्ञेयो हेत्वाभासो विपर्ययात्॥२१॥

सन्द्वयोरिति यः सिद्धः स्वपक्षपरपक्षयोः।
अभिन्नलक्षणः पक्षः फलभेदादयं द्विधा॥२२॥

परपक्षानुपादानं तद्वृत्तेश्चानुदाहृतौ।

कथमन्यतरासिद्धहेत्वाभासव्यवस्थितिः॥२३॥

साध्यधर्मानुगमतः सदृशस्तत्र यश्च सन्।
अन्योऽप्यसावेक इव सामान्यादुपचर्यते॥२४॥

विपक्षस्तद्विसदृशो व्यावृत्तस्तत्र यो ह्यसन्।
इति द्वयैकानुगतिव्यावृत्ती लक्ष्मसाधुता॥२५॥

साध्यसाधनधर्माभ्यां सिद्धो दृष्टान्त उच्यते।
तद्विपर्ययतो वापि तदाभस्तदवृत्तितः॥२६॥

साध्येन लिंगानुगतिस्तदभावे च नास्तिता।
ख्याप्यते येन दृष्टान्तः स किलान्यैर्द्विधोच्यते॥२७॥

दूषणं न्यूनतायुक्तिर्न्यूनं हेत्वादिनाऽत्र च।
तन्मूलत्वात्कथायाश्च न्यूनं नेष्टं प्रतिज्ञया॥२८॥

जातयो दूषणाभासास्ताः साधर्म्यसमादयः।
तासां प्रपञ्चो बहुधा भूयस्त्वादिह नोदितः॥२९॥

अपरं वक्ष्यते न्यायलक्षणं काव्यसंश्रयम्।
इदन्तु शास्त्रगर्भेषु काव्येष्वभिहितं यथा॥३०॥

अथ नित्याविनाभावि दृष्टं जगति कारणम्।
कारणञ्चेन्न तन्नित्यं नित्यञ्चेत् कारणं न तत्॥३१॥

लक्ष्मप्रयोगदोषाणां भेदेनानेन वर्त्मना।
सन्धादि साधनं सिद्ध्यै शास्त्रेषूदितमन्यथा॥३२॥

तज्ज्ञैः काव्यप्रयोगेषु तत्प्रादुष्कृतमन्यथा।
तत्र लोकाश्रयं काव्यमागमास्तत्त्वशंसिनः॥३३॥

असिसंकाशमाकाशं शब्दो दूरानुपात्ययम्।

तदेव वारि सिन्धूनामहो स्थेमा महार्चिषः।
रूपादीनां यथा द्रव्यमाश्रयो नश्यतीति च ॥३४॥

इष्टकार्याभ्युपगमं प्रतिज्ञां प्रतिजानते।
धर्मार्थकामकोपानामाश्रयात्सा चतुर्विधा॥३५॥

जरामेष बिभर्मीति प्रतिज्ञाय पितुर्यथा।
तथैव पुरुणाभारि सा स्याद्धर्मनिबन्धनी।३६।

उपलप्स्ये स्वयं सीतामिति भर्तृनिदेशतः।
हनूमता प्रतिज्ञाय सा ज्ञातेत्यर्थसंश्रया॥३७॥

आहरिष्याम्यमूमद्य महासेनात्मजामिति।
कृत्वा प्रतिज्ञां वत्सेन हृतेति मदनाश्रया॥३८॥

भ्रातुर्भ्रातृव्यमुन्मथ्य पास्याम्यस्यासृगाहवे।
प्रतिज्ञाय यथा भीमस्तच्चकारावशो रुषा॥३९॥

कार्योऽन्यत्र प्रतिज्ञायाः प्रयोगो न कथञ्चन।
परित्यागश्च कर्तव्यो नासां चतसृणामपि॥४०॥

प्रायोपवेशाय यथा प्रतिज्ञाय सुयोधनः।
राज्याय पुनरुत्तस्थाविति धर्मविरोधिनी॥४१॥

आहूतो न निवर्तेऽहं द्यूतायेति युधिष्ठिरः।
कृत्वा सन्धां शकुनिना दिदेवेत्यर्थबाधिनी॥४२॥

अद्यारभ्य निवत्स्यामि मुनिवद् वचनादिति।
पितुः प्रियाय यां भीष्मश्चक्रे सा कामबाधिनी॥४३॥

अत्याजयद्यथा रामः सर्वक्षत्रवधाश्रयाम्।
जामदग्न्यं युधा जित्वा सा ज्ञेया कोपबाधिनी॥४४॥

अथाभ्युपगमप्राप्तिः सन्धाभ्युपगमाद् विना।
अनुक्तमपि यत्रार्थादभ्युपैति यथोच्यते॥४५॥

किमिन्द्रियद्विषा ज्ञेयं को निराक्रियतेऽरिभिः।
किमित्ययं तु यः क्षेपः सौकर्यं दर्शयत्यसौ॥४६॥

हेतुस्त्रिलक्ष्मैव मतः काव्येष्वपि सुमेधसाम्।
अन्वयव्यतिरेकौ हि केवलावर्थसिद्धये॥४७॥

यथाभितो वनाभोगमेतदस्ति महत्सरः।
कूजनात्कुररीणाञ्च कमलानाञ्च सौरभात्॥४८॥

अन्यधर्मोऽपि तत्सिद्धिं सम्बन्धेन करोत्ययम्।
धूमादभ्रंकषात्साग्नेः प्रदेशस्यानुमामिव॥४९॥

अपृथक्कृतसाध्योऽपि हेतुश्चात्र प्रतीयते।
अन्वयव्यतिरेकाभ्यां विनैवार्थगतिर्यथा ॥५०॥

दीप्रदीपा निशा जज्ञे व्यपवृत्तदिवाकरा।
हेतुः प्रदीप्रदीपत्वमपवृत्तौ रवेरिह॥५१॥।

तस्यापि सुधियामिष्टा दोषाः प्रागुदितास्त्रयः।
अज्ञानसंशयज्ञानविपर्ययकृतो यथा॥५२॥

काशा हरन्ति हृदयममी कुसुमसौरभात्।
अपामभ्यर्णवर्त्तित्वादेते ज्ञेयाः शरारवः॥५३॥

असौ शुक्लान्तनेत्रत्वाच्चकोर इति गृह्यताम्।
तुल्यजातावदृष्टत्वात्साधयत्यचकोरताम्॥५४॥

उक्तस्यार्थस्य दृष्टान्तं प्रतिबिम्बनिदर्शनम्।
ननूपमानुमैवास्तु न हेत्वनभिधानतः॥५५॥

साध्यसाधनयोर्वृत्तिरुक्ता तत्र हि नेष्यते।
मुखं पद्ममिवेत्यत्र किं साध्यं किञ्च साधनम्॥५६॥

इति प्रयोगस्य यथा कलावपि भवानिह।
श्रेयान् वृद्धानुशिष्टत्वापूर्वे कार्तयुगे यथा॥५७॥

यत्र दृष्टान्तमात्रेण व्यज्येते साध्यसाधने।
तमाहुः शुद्धदृष्टान्तं तन्मात्राविष्कृतेर्यथा॥५८॥

भरतस्त्वं दिलीपस्त्वं त्वमेवैलः पुरूरवाः।
त्वमेव वीर प्रद्युम्नस्त्वमेव नरवाहनः॥५९॥

कथमेकपदेनैव व्यज्येरन्नस्य ते गुणाः।
इति प्रयुञ्जते सन्तः केचिद् विस्तरभीरवः॥६०॥

पदमेक परं साधु नार्वाचीनं निबन्धनम्।
वैपरीत्याद् विपर्यासं कीर्तेरपि करोति तत्॥६१॥।

अहृद्यमसुनिर्भेदं रसवत्त्वेऽप्यपेशलम्।
काव्यं कपित्थमामञ्च केषाञ्चित्सदृशं यथा॥६२॥

प्रजाजनश्रेष्ठवरिष्ठभूभृच्छिरोऽर्चिताङ्घ्रेः पृथुकीर्तिधिष्ण्य !
अहिघ्नपद्मस्य जलारिधाम्नस्तवैव नान्यस्य सुतस्य वृत्तम्॥६३॥

अंशुभद्भिश्च मणिभिः फलनिम्नैश्च शाखिभिः।
फुल्लैश्च कुसुमैरन्यैर्वाचोऽलङ्कुरुते यथा॥६४॥

शुभमरकतपद्मरागचित्रे सफलसपल्लवभूरिचारुवृत्ते।
बहुकुसुमविभूषिते स तस्थौ सुरमुनिसिद्धयुते सुमेरुपृष्ठे॥६५॥

तदेभिरङ्गैर्भूष्यन्ते भूषणोपवनस्रजः।
वाचां वक्रार्थशब्दोक्तिरलंकाराय कल्पते॥६६॥

विरुद्धपदमस्वर्थं बहुपूरणमाकुलम्।

कुर्वन्ति काव्यमपरे व्यायताभीप्सया यथा॥६७॥

एलातक्कोलनागस्फुटबकुललताचन्दनस्पन्दनाढ्य-
मुक्ताकर्पूरचक्रागुरुकमनशिलास्थासकव्यासवीरः।
शंखव्राताकुलान्तस्तिमिमकरकुलाकीर्णवीचीप्रतानो
दध्रे यस्याम्बुराशिः शशिकुमुदसुधाक्षीरशुद्धां सुकीर्तिम् ॥६८॥

इति निगदितास्तास्ता वाचामलंकृतयो मया।
बहुविधकृतीर्दृष्ट्वाऽन्येषां स्वयं परितर्क्य च।
प्रथितवचसः सन्तोऽभिज्ञाः प्रमाणमिहापरे
गुरुतरधियामस्वाराधं मनोऽकृतबुद्धिभिः॥६९॥

॥ इति पञ्चमः परिच्छेदः॥

## षष्ठः परिच्छेदः

सूत्राम्भसं पदावर्तं पारायणरसातलम्।
धातूणादिगणग्राहं ध्यानग्रहबृहत्प्लवम्॥१॥।

धीरैरालोकितप्रान्तममेधोभिरसूयितम्।
सदोपभुक्तं सर्वाभिरन्यविद्याकरेणुभिः॥२॥

नापारयित्वा दुर्गाधममुं व्याकरणार्णवम्।
शब्दरत्नं स्वयङ्गम्यमलङ्कर्त्तुमयं जनः॥३॥

तस्य चाधिगमे यत्नः कार्यः काव्यं विधित्सता।
परप्रत्ययतो यत्तु क्रियते तेन का रतिः॥४॥

नान्यप्रत्ययशब्दा वागाविभाति मुदे सताम्।
परेण धृतमुक्तेव सरसा कुसुमावली॥५॥

मुख्यस्तावदयं न्यायो यत्स्वशक्त्या प्रवर्तते।
अन्यसारस्वता नाम सन्त्यन्योक्तानुवादिनः॥६॥

प्रतीतिरर्थेषु यतस्तं शब्दं ब्रुवते परे।
धूमभासोरपि प्राप्ता शब्दतान्यानुमां प्रति॥७॥

नन्वकारादिवर्णानां समुदायोऽभिधेयवान्।
अर्थप्रतीतये गीतः शब्द इत्यभिधीयते॥८॥

प्रत्येकमसमर्थानां समुदायोऽर्थवान्कथम्।
वर्णानां क्रमवृत्तित्वान्न्याय्या नापि च संहतिः॥९॥

न चापि समुदायिभ्यः समुदायोऽर्थवान्कथम्।
दारुभित्तिभुवोऽतीत्य किमन्यत्सद्म कल्प्यते॥१०॥

तस्मात्कूटस्थ इत्येषा शाब्दी वः कल्पना वृथा।
प्रत्यक्षमनुमानं वा यत्र तत्परमार्थतः॥११॥

शपथैरपि चादेयं वचो न स्फोटवादिनाम्।
नभःकुसुममस्तीति श्रद्दध्यात्कः सचेतनः॥१२॥

इयन्त ईदृशा वर्णा ईदृगर्थाभिधायिनः।
व्यवहाराय लोकस्य प्रागित्थं समयः कृतः॥१३॥

स कूटस्थोऽनपायी च नादादन्यश्च कथ्यते।
मन्दाः साङ्केतिकानर्थान्मन्यन्ते पारमार्थिकान्॥१४॥

विनश्वरोऽस्तु नित्यो वा सम्बन्धोऽर्थेन वा सता।
नमोऽस्तु तेभ्यो विद्वद्भ्यः प्रमाणं येऽस्य निश्चितौ॥१५॥

अन्यापोहेन शब्दोऽर्थमाहेत्यन्ये प्रचक्षते।
अन्यापोहश्च नामान्यपदार्थापाकृतिः किल॥१६॥

यदि गौरित्ययं शब्दः कृतार्थोऽन्यनिराकृतौ।
जनको गवि गोबुद्धेर्मृग्यतामपरो ध्वनिः॥१७॥

अर्थज्ञानफलाः शब्दा न चैकस्य फलद्वयम्।
अपवादविधिज्ञाने फले चैकस्य वः कथम्॥२८॥

पुरा गौरिति विज्ञानं गोशब्दश्रवणाद् भवेत्।
येनागोप्रतिषेधाय प्रवृत्तो गौरिति ध्वनिः॥१६॥

वर्णभेदादिदं भिन्नं वर्णाः स्वांशविकल्पतः।
के शब्दाः किञ्च तद्वाच्यमित्यहो वर्त्म दुस्तरम्॥२०॥

द्रव्यक्रियाजातिगुणभेदात्ते च चतुर्विधाः।
यदृच्छाशब्दमप्यन्ये डित्थादिं प्रतिजानते॥२१॥।

नानाभाषाविषयिणामपर्यन्तार्थवर्तिनाम्।
इयत्ता केन वाऽमीषां विशेषादवधार्यते॥२२॥

वक्रवाचां कवीनां ये प्रयोगं प्रति साधवः।

प्रयोक्तुं ये न युक्ताश्च तद्विवेकाऽयमुच्यते॥२३॥

नाप्रयुक्तं प्रयुञ्जीत चेतःसम्मोहकारिणम्।
तुल्यार्थत्वेऽपि हि ब्रूयात्को हन्तिं गतिवाचिनम्॥२४॥

श्रौत्रादिं न तु दुर्बोधं न दुष्टादिमपेशलम्।
ग्राम्यं न पिण्डीशूरादिं न डित्थादिमपार्थकम्॥२५॥

नाऽप्रतीतान्यथार्थत्वं धात्वनेकार्थतावशात्।
न लेशज्ञापकाकृष्टं स हन्ति ध्याति वा यथा॥२६॥

न शिष्टैरुक्तमित्येव न तन्त्रान्तरसाधितम्।
छन्दोवदिति चोत्सर्गान्न चापि च्छान्दसं वदेत्॥२७॥

क्रमागतं श्रुतिसुखं शब्दमर्थ्यमुदीरयेत्।
अतिशेते ह्यलंकारमन्यं व्यञ्जनचारुता॥२८॥

सिद्धो यश्चोपसंख्यानादिष्ट्या यश्चोपपादितः।
तमाद्रियेत प्रायेण न तु योगविभागजम्॥२९॥

इयं चन्द्रमुखी कन्या प्रकृत्यैव मनोहरा।
अस्यां सुवर्णालंकारः पुष्णाति नितरां श्रियम्॥३०॥

वृद्धिपक्षं प्रयुञ्जीत सङ्क्रमेऽपि मृजेर्यथा।
मार्जन्त्यधररागं ते पतन्तो वाष्पबिन्दवः॥३१॥।

सरूपशेषं तु पुमान् स्त्रिया यत्र च शिष्यते।
यथाह वरुणाविन्द्रौ भवौ शर्वौ मृडाविति॥३२॥

यथा पटयतीत्यादि णिच्प्रातिपदिकात्ततः।
णाविष्ठवदितीष्ट्या च तथा क्रशयतीत्यपि॥३३॥

प्रयुञ्जीताव्ययीभवमदन्तं नाप्यपञ्चमि।
तृतीयासप्तमीपक्षे नालुग्विषयमानयेत्॥३४॥

तिष्ठद्गुप्रभृतौ वाच्यौ नक्तंदिवसगोचरौ।
यथा विद्वानधीतेऽसौ तिष्ठद्गु च वहद्गु च॥३५॥

शिष्टप्रयोगमात्रेण न्यासकारमतेन वा।
तृचा समस्तषष्ठीकं न कथञ्चिदुदाहरेत्॥३६॥

सूत्रज्ञापकमात्रेण वृत्रहन्ता यथोदितः।
अकेन च न कुर्वीत वृत्तिं तद्गमको यथा॥३७॥

पञ्चराजीति च यथा प्रयुञ्जीत द्विगुं स्त्रियाम्।
नपुंसकं तत्पुरुषं पुरुहूतसभं यथा॥३८॥

सर्वेभ्यश्च भृशादिभ्यो वदेल्लुप्तहलं यथा।
प्रियोन्मनायते सा ते किं शठाभिमनायसे॥३९॥

तृतीयैकवचः षष्ठ्यामामन्तञ्च वदेत्क्विपि।
यथोदितं बलभिदा सुरुचां विद्युतामिव॥४०॥

असन्तमपि यद्वाक्यं तत्तथैव प्रयोजयेत्।
यथोच्यतेऽम्भसा भासा यशसामम्भसामिति॥४१॥।

पुंसि स्त्रियाञ्च क्वस्वन्तमिच्छन्त्यच्छान्दसं किल।
उपेयुषामपि दिवं यथा न व्येति चारुता॥४२॥

इभकुम्भनिभे बाला दधुषी कञ्चुकं स्तने।
रतिखेदपरिश्रान्ता जहार हृदयं नृणाम्॥४३॥

शबलादिभ्योऽतितरां भाति णिज्विहितो यथा।
बलाकाः पश्य सुश्रोणि घनाञ्छबलयन्त्यमूः॥४४॥

शिशिरासारकणिकासदृशः सेतुगन्धवाट्।
त्वां वीजयति सुश्रोणि रतिखेदालसेक्षणाम्॥४५॥

एवं णिचः प्रयोगस्तु सर्वत्रालङ्कृतिः परा।
लिङ्गत्रयोपपन्नञ्च ताच्छील्यविषयं णिनिम्॥४६॥

तस्या हारी स्तनाभोगो वदनं हारि सुन्दरम्।
हारिणी तनुरत्यन्तं कियन्न हरते मनः॥४७॥

ताच्छील्यादिषु चेष्यन्ते सर्व एवं तृनादयः।
विशेषेण च तत्रेष्टा युच्कुरज्वरजिष्णुचः॥४८॥

क्तिन्नन्तञ्च प्रयुञ्जीत संगतिः संहतिर्यथा।
शाकारौ जागुरिष्टौ च जागर्या जागरा यथा॥४९॥

उपासनेति च युचं नित्यमासेः प्रयोजयेत्।
ल्युटञ्च कर्तृविषयं देवनो रमणो यथा॥५०॥

अणन्तादपि डीबिष्टो लक्ष्मीः पौरन्दरी यथा।
अञ्महारजनाल्लाक्षारोचनाभ्यां तथा च ठक्॥५१॥।

ड्मतुबिष्टञ्च कुमुदाद् यथेयं भूः कुमुद्वती।
ठक् चापि तेन जयतीत्याक्षिकः शास्त्रिको यथा॥५२॥

हितप्रकरणे णञ्च सर्वशब्दात्प्रयुञ्जते।
ततश्छमिष्ट्या च यथा सार्वः सर्वीय इत्यपि॥५३॥

वदेदिनिजन्तञ्च पटिमा लघिमा यथा।
विशेषेणेयसुन्निष्टो ज्यायानाप कनीयसीम्॥५४॥

द्वयसज्दघ्नचाविष्टौ प्रमाणविषयौ यथा।
जानुदघ्नी सरिन्नारीनितम्बद्वयसं सरः॥५५॥

मतुप्प्रकरणे ज्योत्स्नातमिस्राशृंङ्गिणादयः।
इनच्च फलबर्हाभ्यां फलिनो बर्हिणो यथा॥५६॥

इनिः प्रयुक्तः प्रायेण तथा ठंश्च मनीषिभिः।
तत्रापि मेखलामालामायानां सुतरां मता॥५७॥

अभ्यस्ताज्झेरदादेशे दधतीत्यादयोऽपि च।
रोदिति स्वपितीत्यादि सहेटा सार्वधातुकम्॥५८॥

अभ्यस्तेषु प्रयोक्तव्यमदन्तं घुभृञोः शतुः।
असौ दधदलंकारं स्रजं बिभ्रच्च शोभते॥५९॥

न तवर्गं शकारेण क्वचित्संयोगिनं वदेत्।
यथैतच्छ्याममाभाति वनं वनजलोचने॥६०॥

नैकत्रौकारभूयस्त्वं गतो यातो हतो यथा।
सावर्ण्यवज्झयो हस्य ब्रूयान्नान्यत्र पद्धतेः॥६१॥

शालातुरीयमतमेतदनुक्रमेण
को वक्ष्यतीति विरतोऽहमतो विचारात्।
शब्दार्णवस्य यदि कश्चिदुपैति पारं
भीमाम्भसश्च जलधेरिति विस्मयोऽसौ॥६२॥

विद्यानां सततमपाश्रयोऽपरासां
तासूक्तान्न च विरुणद्धि कांश्चिदर्थान्।
श्रद्धेयं जगति मतं हि पाणिनीयम्
माध्यस्थ्याद् भवति न कस्यचित् प्रमाणम्॥६३॥

अवलोक्यं मतानि सत्कवीनामवगम्य स्वधिया च काव्यलक्ष्म।
सुजनावगमाय भामहेन ग्रथितं रक्रिलगोमिसूनुनेदम्॥६४॥

षष्ट्या शरीरं निर्णीतं शतषष्ट्या त्वलङ्कृतिः।
पञ्चाशता दोषदृष्टिः सप्तत्या न्यायनिर्णयः॥६५॥

षष्ट्या शब्दस्य शुद्धिः स्यादित्येवं वस्तुपञ्चकम्।
उक्तं षड्भिः परिच्छेदैर्भामहेन क्रमेण वः॥६६॥

॥ इति षष्ठः परिच्छेदः॥

# परिशिष्ट- १

## पद्यानुक्रमणिका


अखण्डमण्डलः क्वेन्दुः २-४४

अणन्तादपि ङीबिष्टः ६-५१

अतोऽभिवाञ्छता कीर्तिम् २-८

अत्याजयद् यथा रामः ५-४४

अत्रापि बहु वक्तव्यम् ४-७

अत्रार्थपुनरुक्तं यत् ४-१५

अथ नित्याविनाभावि ५-३१

अथ प्रतिज्ञाहेत्वादि ५-१

अथ लिङ्गवचोभेदौ २-५२

अथाभ्युपगमप्राप्तिः ५-४५

अद्यारभ्य निवत्स्यामि ५-४३

अधनस्येव दातृत्वम् १-३

अधिकारादपेतस्य ३-२९

अनन्तरैकान्तरयोः १-१६

अनयान्यदपि ज्ञेयम् २-५७

अनलङ्कृतकान्तं ते ३-५

अनिबद्धं पुनर्गाथा १-३०

अनुप्रासः सयमकः २-४

अन्तर्योधशताकीर्णम् ४-४

अन्यधर्मोऽपि तत्सिद्धिम् ५-४९

अन्यापोहेन शब्दोऽर्थम् ६-२६

अन्येषामपि कर्तव्या ३-५२

अन्यैः स्वचरितं तस्याम् १-२९

अपरं वक्ष्यते न्याय ५-३०

अपह्नुतिरभीष्टा च ३-२१

